# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

ब्रह्मचारिणा मनोमयेन अनूदितम्

दक्षिणेश्वरे श्रीरामकृष्णदेवः तस्य सुदीर्घसाधनायाः समापनान्ते त्यागिभक्तैः साकं सम्मेलनवासनया एकदा श्रीश्रीजगन्मातुः श्रीचरणारविन्दयोः न्यवेदयत्– 'विषयिभिः संसारिभिः जनैः सह वार्तालापेन मम जिह्वा ज्वलन्ती अस्ति।' जगन्माता तम् आश्वासितवती– 'मा भैषीः, त्यागिनः शुद्धसात्त्विकभक्ताः आगमिष्यन्ति' इति। परिणामेन यथाकालं त्यागिनः युवानः आगच्छन्तः आसन्। एतेषु अन्तरङ्गेषु श्रीयुक्तः राखालः आसीद् अत्युन्नतस्तरीयः। सः स्वल्पसङ्ख्यकानाम् ईश्वरकोटीनाम् अन्यतमः, ठाकुरस्य मानसपुत्रश्च आसीत्। जगन्माता तस्य आगमनवार्तां पूर्वम् एव श्रीरामकृष्णदेवं ज्ञापितवती आसीत्। ठाकुरः विवृणोति स्म यत्– "राखालस्य आगमनस्य कतिपयदिवसेभ्यः प्राग् अहम् अद्राक्षं, जगन्माता बालकम् एकं सहसा मम क्रोडे स्थापयित्वा अवदत्, 'एषः तव पुत्रः'। एतच्छ्रवणानन्तरं शङ्कितः कातरः सन् अवदम्– 'किं वदसि? मम पुनः पुत्रः?', तदा सा हसन्ती ज्ञापितवती– 'साधारणसंसारिभावेन उत्पन्नः पुत्रः न, त्यागी मानसपुत्रः। तदा आश्वस्तः अभवम्। अस्माद् दर्शनात् परं राखाले आगते अहम् अवगतवान्– एषः एव सः बालकः।"

१८६३ खृष्टाब्दस्य जनवरीमासे मङ्गलवासरे (१२६९ वङ्गाब्दस्य माघमासस्य अष्टमे दिनाङ्के, चान्द्रमाघे शुक्लद्वितीयायां तिथौ, रात्रौ प्रायः एकवादने) वसिरहाट्-मण्डलान्तर्गते शिकडाकुलीनग्रामे अतिसम्भ्रान्तवंशे राखालचन्द्रघोषः जन्म अलभत। तस्य पिता आनन्दमोहनघोषः समृद्धः भूस्वामी आसीत्। यदा सः पञ्चमवर्षीयः तदा तस्य माता कैलासकामिनी परलोकं गतवती। अतःपरं पिता द्वितीयं विवाहं कृतवान्। विमातुः हेमाङ्गिन्याः स्नेहमये क्रोडे राखालचन्द्रः परिपाल्यमानः आसीत्।

उपयुक्ते वयसि राखालचन्द्रस्य विद्याभ्यासनिमित्तम् आनन्दमोहनः गृहस्य समीपम् विद्यालयम् एकं प्रतिष्ठाप्य, राखालं तत्र प्रावेशयत्। तत्र बालकस्य सौम्यसुन्दराकृत्यां माधुर्यमयकोमलप्रकृत्यां च छात्राः शिक्षकाश्च सर्वे आकृष्टाः अभवन्। किञ्च अत्यल्पदिनाभ्यन्तरे एव सः सहपाठिनां नेतृत्वम् अलभत। अध्ययनादिषु अपि तस्य विशेषबुद्धिमत्ता अभिज्ञाता। स्वभावेनैव राखालः बन्धुवत्सलः आसीत्। शिक्षकाः छात्रान् ताडयन्ति चेत् सः समवेदनया अभिभूतः भवति स्म। परिणामतः शिक्षकाणाम् अन्तः अपि क्रमेण कोमलतायाः सञ्चारः अभूत्, ततः ते तादृशं गर्हितम् अभ्यासं त्यक्तवन्तश्च। विद्यालयस्य पाठं विहाय, अन्येषु विषयेषु अपि राखालस्य उत्साहः आसीत्। क्रीडादिषु तेन सदृशः यथा कोऽपि नासीत्, मल्लक्रीडायाम् अपि तथैव। ग्रामस्य विभिन्नासु प्रतिस्पर्धासु सः असाधारणं नैपुण्यं प्रदर्शयति स्म। पितुः इव तस्य अपि पुष्पफलोद्यानेषु विशेषप्रीतिः बाल्यकालाद् एव परिलक्ष्यते स्म। एतद् विहाय पुष्करिण्याः पार्श्वे उपविश्य ततः बडिशेन मत्स्याहरणम् अपि तस्य कृते प्रमोदस्य विषयः आसीत्।

एवं चिन्तनं दोषाय भवति यत्, साधारणः बालकः इव सः क्रीडादिषु केवलं मत्तः अतिष्ठद् इति। ग्रामस्य उपकण्ठे कालीमन्दिरस्य समीपे बोधनास्थाने[२] सः कदाचिद् बालकैः साकं निजनिर्मितस्य श्यामाकालीविग्रहस्य पूजादिषु निमग्नः भवति स्म। पुनः तस्य गृहे प्रतिवत्सरं यदा शारदीयदुर्गामहोत्सवः उद्याप्यते स्म, तदा पूजामण्डपे पूजकानां पृष्ठभागे उपविश्य पूजां पश्यन् तन्मयः भवति स्म, किञ्च सायङ्काले अनिमेषनयनाभ्यां मातुः आरात्रिकं पश्यन् कस्मिंश्चिद् अज्ञाते प्रदेशे आत्मानं लोपयति

[२] यत्र शारदीयदुर्गापूजासमये देव्याः बोधनकृत्यं सम्पाद्यते तत् स्थानम्


*dīpaśikhā*/v1/2023/Brahmachari Manamoy/pp. 25-27

स्म। सङ्गीते तस्य महती प्रीतिः आसीत्। तदा तदा ग्रामाद् बहिः एकस्मिन् निभृते स्थाने मित्रैः साकं श्यामासङ्गीतं गायन् एतावतीं तन्मयतां प्राप्नोति स्म यद् देशकालज्ञानम् अपि अलुप्यत। कस्यचिद् अपि कण्ठे नूतनं श्यामासङ्गीतं शृणोति चेत् तत्सकाशात् सः तत्सङ्गीतम् अशिक्षत, पुनः वैष्णवभिक्षुकाणां कण्ठे वृन्दावनस्य मुरलीधरस्य वाहीकराजस्य गीतं श्रुत्वा सः आत्मस्थः भवति स्म।

पाठशालायाः पाठं समापितवन्तं द्वादशवर्षीयं तं आङ्गलेय्याः शिक्षायाः अध्ययनार्थं कलिकाताम् आनीतवान् पिता वाराणसीघोषस्ट्रिट्-नामकस्थे स्वस्य द्वितीयपक्षीयश्वशुरालये वासं परिकल्प्य समीपवर्तिनं 'ट्रेनिं एकाडेमि' नामकं विद्यालयं प्रेषयामास (१८७५ खृष्टाब्दे)। अस्मिन् समये नरेन्द्रनाथेन सह तस्य प्रथमपरिचयः जातः। भावी विश्वविजयी स्वामी विवेकानन्दः तदा पल्लीबालकानां नेता। विद्यालये राखालस्य नरेन्द्रनाथस्य च त्रिचतुरैः वर्गैः अन्तरम् आसीत्, किन्तु तयोः वयः समानम् एव आसीत्। दर्शनेन एव राखालः नरेन्द्रम् अभि आकृष्टोऽभवत् किञ्च उभयोः सख्यम् उदितम्। द्वावपि एकस्मिन्नेव मल्लक्रीडाङ्गने मिलित्वा मल्लक्रीडाम् अभ्यस्यतः स्म। पुनः वयसि विवृद्धे नरेन्द्रस्य आकर्षणेन युगपद् ब्राह्मसमाजम् अपि अगच्छताम्। इत्थं विविधसंस्थाभिः सम्बन्धवशाद् अध्ययनस्य हानिं परिलक्ष्य चिन्ताग्रस्तः पिता आदौ अनुरोधोपरोधाभ्यां, तत्र च विफलः सन् कठोरानुशासनेन अध्ययने पुत्रस्य मन आकर्षयितुम् अयतत। किन्तु फलम् अनभिलक्ष्य उपायान्तरं च अप्राप्य परिजनैः परामृश्य निरचिनोद् यत्, विवाह एव अस्य प्रकृष्टः प्रतिकारः। घटनानां क्रमेण शीघ्रम् अभीष्टा वधूः अपि प्राप्ता। कोन्नगराभिजनः श्रीयुतः मनोमोहनमित्रः तदा कलिकातायां काँसारिपाडायाः समीपे सिमुलियापल्ल्यां न्यवसत्। तस्य विश्वेश्वरी इति सर्वसुलक्षणा विवाहयोग्या भगिनी अभूत्। १८८१ खृष्टाब्दस्य मध्यभागे सम्भ्रान्तकायस्थकुलोद्भूतया तया कन्यया राखालस्य परिणयः सम्पन्नः। विश्वेश्वरी तदा अपि बालिका– वयः एकादशवर्षाणि अतिक्रान्तम्।

मानवाः स्वाभिप्रायसिद्ध्यर्थं जगति बहु किमपि कुर्वन्ति, परन्तु विधेः विधानेन फलं भिन्नम् एव फलति। राखालस्य पिता परिणयं कारयित्वा राखालं मायाबन्धनेन बद्धुम् अचेष्टत, परन्तु अयं परिणयः एव शीघ्रं राखालं दक्षिणेश्वरम् आनयत्। राखालस्य ज्येष्ठः श्यालकः मनोमोहनः प्राग् एव श्रीरामकृष्णस्य चरणम् आश्रितवान्। धर्मशीला श्वश्रूमाता अपि श्रीरामकृष्णं प्रति श्रद्धालुः आसीत्। विवाहात् परं कोन्नगरात् कलिकातां प्रत्यावर्तनकाले मनोमोहनः श्वशुरगृहागतं राखालं दक्षिणेश्वरम् आनीतवान्।

अस्मै शुभलग्नाय जगदम्बा पूर्वम् एव श्रीरामकृष्णस्य मनः प्रस्तुतवती आसीत्। एकस्मिन् दिवसे ठाकुरः भावचक्षुषा ददर्श, वटवृक्षमूले कश्चिद् बालः स्थितः अस्ति। मनसि काचिद् आशङ्का उदिता, किमर्थम् एतादृशं दर्शनं जातम् इति? भागिनेयं स्वहृदयगतं सन्देहं यदा ज्ञापितवान्, तदा सोल्लासं हृदयः उक्तवान्, "मातुल, तव सन्तानः भविता– तस्माद् एतादृशं दर्शनं जातमि"ति। शुद्धः अपापविद्धः महापुरुषः चमत्कृतः सन् अगदत्, "किमुच्यते त्वया? मम मातृयोनिः, पुनः मम सन्तानः कथं भविता?" अस्य प्रश्नस्योत्तरदानं हृदयेन न शक्तं, परन्तु जगदम्बा अदात्। प्रसङ्गः प्रबन्धस्य प्रारम्भे एव उल्लिखितः। प्रतीक्षमानस्य शुद्धसत्त्वस्य मानसपुत्रस्य राखालस्य आगमनात् प्राग् एकद्युः भावचक्षुषा ठाकुरः दृष्टवान्– सहसा गङ्गावक्षसि शतदलानि पद्मपुष्पाणि प्रस्फुटन्ति स्म। तेषां दलेषु अपूर्वा शोभा विराजते। चिरकिशोरस्य वाहीकराजस्य श्रीकृष्णस्य हस्तधारणपूर्वकं तदनुरूपः कश्चिद् बालकः पादयोः नूपुरं धारयन् शतदलेषु नृत्यति स्म। नृत्यस्य अपूर्वच्छन्दसि माधुर्यसिन्धोः उच्छ्वासः। इदं परिलक्षयन् श्रीरामकृष्णः आत्मनिमग्नः अभवत्। अस्मिन् समये एव राखालचन्द्रः आविर्बभूव। विस्मयेन श्रीरामकृष्णः दृष्टवान्, एषः एव तेन दृष्टचरः वटवृक्षमूले स्थितः बालकः, जगदम्बया प्रदर्शितः मानसपुत्रः, कमलदले नृत्यपरायणः व्रजकिशोरः कृष्णसखा, सः सर्वं दृष्टवान्,

सर्वं स्मृतवांश्च, परन्तु आत्मतृप्तः महामानवः बहिः कम् अपि आवेगोच्छ्वासादिकं न प्रकाशितवान्। गाम्भीर्येण अनिमीलितचक्षुषा राखालं निरीक्ष्य मित्रं मनोमोहनम् उक्तवान्, "सुन्दरः आधारः।" अतःपरम् अतिपरिचितः इव तेन सह स्नेहसम्भाषणम् आरब्धवान्, "तव नाम किम्?"

– "श्रीराखालचन्द्रघोषः।"





*dīpaśikhā*/v1/2023/Brahmachari Manamoy/pp. 25-27